⊛ श्रीमद्भगवद्गीतायां प्रतिपादितं गुणत्रयतत्त्वम् मनसि च तेषां प्रभावः आलोचनीयः ।

→ महर्षिणा कृष्णद्वैपायनेन व्यासदेवेन विरचिता श्रीमद्भगवद्गीता महाभारतस्य भीष्मपर्वान्तर्गता । तत्र भगवता श्रीकृष्णेन अर्जुनमुद्दिश्य यानि उपदेशवचनानि कथितानि तेषु अन्यतमम् गुणत्रयतत्त्वम् ।

गुणशब्दः पारिभाषिकः । भिन्नेषु शास्त्रेषु अयं शब्दः पृथक् पृथगर्थेषु प्रयुज्यते । गुणः त्रिविधः – सत्त्वं रजः तमश्चेति । श्रीमद्भगवद्गीतायामुक्तं गुणशब्देन सांख्यदर्शनसम्मतं सत्त्वं रजस्तमश्चेति गुणत्रयमेव अवबुध्यते । उक्तं च गुणत्रयविभागयोगशीर्षके चतुर्दशाध्याये —

"सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्" ॥

गुणा नित्यपरतन्त्राः, क्षेत्रज्ञं प्रति अविद्यात्मकत्वात् क्षेत्रज्ञं निबध्नन्ति इव, तम् आस्पदीकृत्य आत्मानं प्रतिलभन्ते इति निबध्नन्ति इति उच्यते । एते त्रिगुणाः अस्मिन् देहे अव्ययं देहिनं निबध्नन्ति ।

मोक्षमार्गप्रदर्शनमेव लोकायतभिन्नदर्शनसम्प्रदायानां प्रधानप्रतिपाद्यत्वेऽपि अपवर्गलाभोपायाः भिन्नाः । प्रकृतिपुरुषयोः भेदज्ञानेन मुक्तिः इति सांख्यशास्त्रस्याभिमतम् । निर्गुणपुरुषात् त्रिगुणात्मकव्यक्तजगदव्यक्तप्रकृत्योः भेदनिर्णयावसरे सांख्यदर्शने गुणत्रयस्य सामान्योल्लेखो दृश्यते । तदुक्तं श्रीमदीश्वरकृष्णविरचितायां सांख्यकारिकायाम् —

"त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानम्, तद्विपरीतस्तथा च पुमान्" ॥

श्रीमद्भगवद्गीतायां यद्गुणत्रयतत्त्वं प्रतिपादितं तेन सह सांख्यदर्शनस्य सादृश्यं वर्तते ।

त्रिविधेषु गुणेषु प्रथमस्तावत् सत्त्वगुणः। अयं गुणः स्फटिकमणिः इव स्वच्छत्वात् भास्वरं, ज्ञानात्मकत्वात् प्रकाशकं निरुपद्रवं सुखदायकम्। उक्तं च भगवता —

"तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ"॥

सत्त्वगुणः सुखसङ्गेन ज्ञानसङ्गेन च देहे देहिनं बध्नाति। ज्ञानमिति सुखसाहचर्यात् क्षेत्रस्य एव अन्तःकरणस्य धर्मो न तु आत्मनः। सत्त्वगुणः सुखाभिमुखं करोति। सत्त्वं लघु प्रकाशकमिति सांख्यमतम्।

द्वितीयस्तावत् रजोगुणः। रजोऽनुरञ्जनरूपं तृष्णासङ्गाभ्यामुद्भूतम्। तत्रोच्यते —

"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्"॥

रजः कर्मण्येव प्रेरयति। उपष्टम्भकं चलञ्च रजः इति सांख्यमतम्। अयं रजोगुणः कर्मसङ्गेन देहेऽस्मिन् देहिनं पुरुषं निबध्नाति।

तृतीयस्तावत् तमोगुणः। तमस्त्वज्ञानाज्जातमावरणशक्तिप्रधानात् प्रकृत्यंशादुद्भूतम्। उक्तं च श्रीकृष्णेन —

"तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत"॥

अयं तमोगुणः सर्वेषां देहिनां भ्रान्तिजनकत्वात् प्रमादेन आलस्येन निद्रया च पुरुषं निबध्नाति।

सांख्यदर्शने एतेषां गुणत्रयाणां मनोज्ञं दृष्टान्तं वर्णितम्। यथा वर्त्तितैलेऽमलविरोधिनी तथाप्यनलेन सह मिलित्वा रूपप्रकाशलक्षणरूप-कार्यं कुरुतः, तद्वद्गुणत्रयमपि स्वकार्यं कुर्वन्तीति दिक्।